॥ श्री ॥

# न्याय–द्वैत दर्शनयोः पदार्थविषयः तुलना

सतीश कानुगोवि

एम्. ए (न्याय – वैशेषिक)

योजना प्रबन्धः

२०१९ - २०२०

१. पीठिका ........ 4
१.१. दर्शन प्रपञ्च परिचयः ........ 4
१.२. न्याय दर्शन परिचयः ........ 4
१.३. वैशेषिक दर्शन परिचयः ........ 5
१.४. द्वैत वेदान्त दर्शन परिचयः ........ 6
२. पदार्थ विभागः ........ 8
२.१. न्याय दर्शनोक्त विचारः ........ 8
२.१.१. न्याय दर्शनोक्त तत्त्व विचारः ........ 8
२.१.२. न्याय दर्शनोक्त पदार्थ परिचयः ........ 9
२.२. द्वैत वेदान्तोक्त विचारः ........ 13
२.२.१. द्वैत सिद्धान्त तत्त्व विचारः ........ 13
२.२.१. द्वैत सिद्धान्त पदार्थ विचारः ........ 14
३. न्याय – द्वैत मतयोः केचित् पदार्थज्ञान विषयानाम् विमर्शः ........ 16
३.१. समवायिकारणम् समर्थनम् निरासनम् च ........ 16
३.१.१. न्याय दर्शने समवायिकारणम् समर्थनम् ........ 17
३.१.२. द्वैत दर्शने समवायिकारण निरासनम् ........ 17
३.२. तमसस्य द्रव्य्तवम् समर्थनम् निरासनम् च ........ 20
३.२.१. न्याय दर्शने तमसस्य द्रव्यत्व निरासनम् ........ 20
३.२.१. द्वैत दर्शने तमसस्य द्रव्यत्व साधनम् ........ 21
४. उपसम्हारः ........ 22
५. कृतज्ञता ........ 23
६. सन्दर्भ सूचिका ........ 23

# १.पीठिका

अस्मिन् निबन्धे न्याय वैशेषिक दर्शनस्य, वेदान्त (द्वैत) दर्शन्स्य कानिचन विषय भेदाः न्याय वैशेषिक ग्रन्थः तर्क सङ्ग्रहः (अपि तस्य न्यायबोधिनी दीपिका च व्याख्या) एवम् द्वैत दर्शन ग्रन्थः पदार्थ विवेकः अनुसृत्य विमर्शितः। पदार्थ ज्ञान विषये न्याय–द्वैतमतयोः लक्षणानि, विभागानि अपि अत्र संक्षेपेण संग्रहितानि।

## १.१. दर्शन प्रपञ्च परिचयः

दृश्यते अनेन इति दर्शनम् ।

अर्थात्, येन माध्यमेन सम्यक् ज्ञानं भवति तत् प्रत्यक्ष–अनुमान–उपमान–शब्दादिकं यथार्थ अनुभव साधन भूतम् दर्शनम्।

तत् दर्शनम् द्विविधम् ।

- नास्तिक दर्शनम् ।
- आस्तिक दर्शनम् ।

नास्तिक दर्शनानि एतनि – षट् विधानि ।

- चार्वाक, माध्यमिक, योगाचार, सौत्रान्तिक, वैभाविक, जैन ।

आस्तिक दर्शनानि एतानि – षट् विधानि ।

- वैशेषिक, न्याय, सांख्य, योग, पूर्वमीमांसा, वेदान्त ।

## १.२. न्याय दर्शन परिचयः

न्याय सूत्राणाम् रचयिता भगवान् गौतमः । वात्स्यायनेन भाष्यं प्रणीतम् । उध्योतकरः वार्तिकं चकार ।

वाचस्पति मिश्रः वार्तिक तात्पर्यप्रणयनेन समग्रस्यापि न्याय शास्त्रस्य स्वरूपं प्रकटी चकार ।

न्याय दर्शनानुसारेण पदार्थ तत्वज्ञानं मुक्तिकारणम् ।

न्याय सूत्रे एवं सूत्रः वर्तते –

पदार्थाश्च प्रमाण – प्रमेय – संशय – प्रयोजन – दृष्टान्त – सिद्धान्त –

अवयव – तर्क – निर्णय – वाद – जल्प – वितंड – हेत्वाभास – छल – जाति – निग्रह स्थान भेदेन षोडश इति ।

अस्य न्याय शास्त्रं अन्वीक्षिकी इत्यपि नाम कथ्यते ।

**सिद्धान्तः**

संसार बन्धनस्य मूलं मिथ्याज्ञानम् ।

दुःख जन्म दोष मिथ्या ज्ञानानाम् उत्तरोत्तरापाये पूर्व पूर्व विनाशेन अपवर्गो भवति।

एवं गौतम सूत्रः

*'दुःख जन्म प्रवृत्ति दोअ मिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः'' (न्या.सू.१.१.२.)*

अस्य दर्शने प्रत्यक्ष, अनुमान, उपमान, शब्दाः चत्वारि प्रमाणानि ।

अस्य दर्शने वेदः अपौरुशेयः इति न मन्यते ।

अर्थापत्ति संभवादीनां चतुर्ष्वेषु प्रमाणेषु अन्तर्भावः इति मन्यन्ते।

प्रमातव्या विषया एवं इति – अत्म, शरीर, इन्द्रिय, अर्थ, बुद्धि, मनः, प्रवृत्ति, दोष, प्रत्याभाव, फल, दुःख, अपवर्गाः इति द्वादश ।

ज्ञान सुख दुःखादि गुणाश्रयाः चेतनाः शरीर भेदेन भिन्नाः अनन्ता एव, विभुप्रिमाणोपेताः।

तत्त्वज्ञानेन च मिथ्या ज्ञानापाये एकविंशति दुःख निवृत्तिरूपः मोक्षः सम्पद्यत इति सिद्धांतः ॥

## १.३. वैशेषिक दर्शन परिचयः

वैशेषिक दर्शनस्य प्रणीता महर्षिः कणादः ।

एतद् दर्शनम् औलूक्य दर्शन पदेनापि सुप्रसिद्धम्।

अस्य मूलग्रन्थः वैशेषिक सूत्रम् ।

सूत्रकृता कणादेन द्रव्य – गुण –कर्म – सामान्य – विशेष – समवाय इति षड् भाव पदार्थाः निरुपिताः ।

प्रशस्तपादाचार्यकृतंभाष्यम् इह प्रसिद्धम् ।

भाष्यकारः अभावस्यापि पृथक् पदार्थत्वं अंगीकृतम् ।

एवं सप्तप्दार्थाः वैशेषिक मते अंगीकृताः ।

अस्य दर्शने प्रत्यक्ष, अनुमान द्वे एव प्रमाण इति न्याय कंदलीकार मतानुयायिनः निरूप्यंते ।

प्रत्यक्ष, अनुमान, शब्दश्च इति त्रीणि प्रमाणानि इति व्योम शिवाचार्यः मन्यंते ।

इतरेषां प्रमाणानाम् अनुमाने अंतर्भावः, अनुप्लिब्ध प्रमाणम् प्रत्यक्षे अन्तर्भावः इति ।

**<u>सिद्धान्तः</u>**

अयम् आत्मा संसार दशायां मिथ्याज्ञान्निमित्तं दुःखम् अनुभवति।

तत्त्वज्ञानेन च मिथ्याज्ञानम् अपैति ।

तदपाये दोषादीनाम् अपायः ।

ततश्च आत्यान्तिक दुःखनिवृत्तिः, सैव मुक्तिः ।

मुक्तौ सुखाभावेपि दुःखमात्रनिवृत्ति सद्भावात् पुरुषार्थम् उपपन्नम् ।

## १.४. द्वैत वेदान्त दर्शन परिचयः

वेदोपनिषदितिहास, पुराणादि वाङ्मयप्रपञ्चम् उपजीव्य प्रवृत्तम् इदं द्वैतदर्शनम् ।

श्रीमध्वाचार्याः भाष्यकाराः ।

एषां पूर्णप्रज्ञ – आनन्दतीर्थ – सर्वज्ञाचार्य – तत्त्वज्ञाचार्य – सुखतीर्थादि नामानि सन्ति ।

श्रीमज्जयतीर्थ – व्यासतीर्थ – वादिराज तीर्थ – रघूत्तम तीर्थ – र्घवेन्द्रतीर्थ प्रभृतिभिः विरचितैष्टिका टिप्पणीभिः प्रवृत्तम् इदं दर्शनम् ।

श्री रघुनाततीर्थ यतिः विरचित पदार्थ विवेकःअपि सुललितया द्वैत मतानुसार पदार्थ ज्ञानम् विवृणोति । अस्मिन् प्रबन्धे पदार्थ विवेकः अनुसृत्य किञ्चित् पदार्थ विषय भेदाः चर्चितः।

**<u>वेदांतः</u>**

अत्र ज्ञान, विज्ञान, औदार्य, सौन्दर्य, कारुण्याद्यनन्त– अन्राकृत मंगल गुणपूर्णः
भगवान् नारायणः सर्वोत्तमः ।

**<u>सिद्धांतः</u>**

अनादिकर्मबद्धाः जीवाः संसारे भ्रमन्ति ।

यदा वैराग्य भक्तयाद्युपायैः माहात्म्य ज्ञानपूर्वक परमपुरुषम् (नारायणम्) आराधयन्ति तदा मुक्ता भवन्ति ।

भक्त्यादि गुणैः प्रसन्नः (नारायणः) परमात्मा स्वात्मानं दर्शयति।

परमात्मेन अनुग्रहीताः सात्विका जीवाः, प्रारब्धकर्म अनुभूय विगतावरणाः ज्ञाननन्दस्वरूपेण अवतिष्ठन्ते।

राजसा जीवाः सृतावेव सुख् दुःखम् अनुभवंतः नित्यबद्धा भवन्ति ।

तामसा जीवाः हरिगुरुधर्मद्वेषादिना समाजघातुकैः भय उत्पादक व्याहारैः सर्वेषां सर्वदा दुःखमेव प्रयच्छन्तः तादृशीमेव गतिम् प्राप्नुवन्ति ।

मुक्तिः मार्गम् एवं वदन्ति भाष्यकारः मध्वाचार्यः

*“माहात्म्य ज्ञान पूर्वस्तु सुदृढः सर्वतोऽधिकः ।*

*स्नेहो भक्तिरिति प्रोक्तः, तया मुक्तिर्न च अन्यथा ॥”*

*(महाभारत तात्पर्य निर्णये ग्रंथे)*

तस्मात्, माहात्म्यज्ञानपूर्विका सुदृढा अवच्छिन्ना च प्रेमसंततिः भक्तिः उच्यते, अनया एव मुक्तिः भविष्यति ।

वायुः जीवेषु उत्तमः ।

- रुद्र इंद्र गणपति प्रभ्रतयः सर्वे देवाः विष्णाः प्रीतिभाजः प्रिवारभूताः ।
- रुद्रादीनां, तदंतर्गत भारती रमण मुख्यप्राणाद्वारा, तयोः अनुग्रहेणैव जीवः विष्णुप्रसाद द्वारा मुक्तो भवति ।

स्वस्वरूप अभिव्यक्तिरेव मुक्तिः इति सिद्धांतः ।

## २.पदार्थ विभागः

### २.१. न्याय दर्शनोक्त विचारः

### २.१.१. न्याय दर्शनोक्त तत्त्व विचारः

न्याय दर्शनानुसारेण पदार्ध तत्वज्ञानं मुक्तिकारणम् इति ।

वात्स्यायन भाष्ये तत्वम् किं इति विचारः एवं कृतः ।

- ‘‘सतश्च सद्भावेऽसतश्चऽसद्भावः तत्वम् इति’’ ।
- सत् इति गृन्यमाणं यथाभूतं अविपरीतं तत्वं भवति इति । असच्चाऽसविति गृन्यमाणं यथाभूतम्विपरीतं तलं भवति इति ।

कथम् उत्तरस्य प्रमाणेन उपलब्धिः?

- सत्युपलभ्यमाने तद्वदनुपलब्धेः प्रदीपवत् इति ।
- यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति, यद्यभविष्यद्, इदमिव व्यज्ञास्यत विज्ञास्यत विज्ञानाभाद् नास्ति हानि, तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयति इति ।

एतद् सत् पदार्थ षोडशाधा व्यूढम् उपदेक्ष्यते, इति गौतम सूत्रेण एवं उक्तः

> ‘‘प्रमाण, प्रमेय, संशय, प्रयोजन, द्रष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय, वाद, जल्प, वितंड, हेत्वाभास, छल, जाति, निग्रहस्थानानां तत्वपानात्फ़् निश्रेयस अधिगमः’’॥१.१.१॥

एवं न्यायदर्शने तत्वस्य विवेचनं षोदश प्दार्थ तत्वज्ञानेन कृतः ।

अतः पदार्थ तत्वज्ञानं एव मोक्षहेतुः इति प्रतिपादितः ।

''देह एव आत्मा'' इति ज्ञान् मिथ्याज्ञानम् ।

अनेन मिथ्याज्ञानेन देहानुकूलेषु आत्मनः रागः उत्पद्यते।

देहप्रतिकूलेषु द्वेषश्च जायते ।

पदार्थानां तत्वज्ञाने सति ''आत्मा ज्ञानवान्, देहः जडः'' इति यथार्थज्ञानं उत्पद्यते।

ततश्च सुखदुःखयोः अनुत्पादः, तेन मोक्षः।

इत्येवं मोक्षोद्देशेन पदार्थ विभागः, तेषां स्वरूप विमर्शः न्यायदर्शने कृतवान् ।

तार्किकाः द्विविधाः → नैयायिकाः ।

→ वैशेषिकाः ।

नैयायिक मते षोडश पदार्थाः गणिताः ।

वैशेषिकाः पुनः सप्तपदार्थाः इति वदन्ति ।

### २.१.२. न्याय दर्शनोक्त पदार्थ परिचयः

गौतम प्रथम सूत्रे उक्त पदार्थानां सामान्य परिचयं एवं अस्ति ।

**१. प्रमाणम्**

प्रमाकरणं प्रमा इति प्रमाण सामान्य लक्षणम् ।

एतद् चुर्विधम् – प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दश्च ।

प्रमा च यथार्थानुभव रूपा, तत् प्रमा चतुर्विधा – प्रत्यक्ष, अनुमिति, उपमिति, शाब्द रूपा ।

ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्, इन्द्रियार्थ सन्निकर्ष जन्यं ज्ञानं प्रत्यक्षम्,

– अनुमिति करणम् अनुमानम्,

– उपमिति करणम् उपमानम्,

– शाब्दबोध कारणञ्च शब्दः ।

**२. प्रमेयः**

प्रमा विषयीभूतोऽर्थः प्रमेयः ।

स च प्रमेयः द्वादश विधानि

- आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गश्च ।

**३. संशयः**

एकस्मिन् धर्मिणि नानाधर्मवैशिष्ट्य अवगाहिज्ञानं संशयः, यथा एकस्मिन्नेव पुरोवर्तिनि द्रव्ये अयं स्थाणुर्वा पुरुषो वेत्ति संशयः ज्ञायते ।

**४. प्रयोजनम्**

यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् । तच्च सुखप्राप्तिदुःख नाशरूपम् ।

**५. दृष्टान्तः**

लौकिक परीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं सः दृष्टान्तः ।

सः दृष्टान्तः द्विविधाः

१. साधर्म्य दृष्टान्तः । २. वैधर्म्य दृष्टान्तः ।

**६. सिद्धान्तः**

प्रामाणिक्त्वेन अभ्युपगतोऽर्थः सिद्धान्तः ।

एतद् चतुर्विधः

१. सर्वतन्त्र सिद्धान्तः २. प्रतितन्त्र सिद्धान्तः

३. अधिकरण सिद्धान्तः ४. अभ्युपगम सिद्धान्तः

**७. अवयवः**

अनुमान वाक्यस्य एकदेशाः अवयवाः भवन्ति ।

पञ्चबेदाः

१. प्रतिज्ञा ।  २. हेतु ।   ३. उदाहरण ।   ४. उपनय ।  ५. निगमन ।

**८. तर्कः**

अविज्ञात तत्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ।

अयं तर्कः प्रमाणानम् अनुग्राहको भवति ।

**९. निर्णयः**

निश्चयात्मकज्ञानम् निर्णयः ।

**१०. वादः**

तत्ववुभुत्सो कथा वादः । अयं कथायाः अन्यतमः भेदः ।

प्रमाण तर्क साधनोपालम्भः सिद्धांतविरुद्धाः पंचावयव उपपन्नः

पक्षप्रतिपक्ष परिग्रहो वादः इति वाद लक्षणम् ।

**११. जल्पः**

अयममपि कथायाः भेद विशेषः ।

अत्र हेत्वाभासादीनां प्रयोगः विजयप्राप्त्यर्थं भवति ।

लक्षणम् एवं – यथोत्तनोपपन्नः छलजाति नित्रह स्थानसाधनोपालम्भो जल्पः ।

**१२. वितण्डा**

स्वपक्ष स्थापनाहीनो वितण्डा ।

स्वपक्षस्थापनां विना यः केवलं परोक्ते दूषणं सम्पादयति सः वैतण्डिकः ।

**१३. हेत्वाभासः**

गंगेश उपाध्यायः एवं उक्तः – अथ हेत्वाभासाः तत्वनिर्णय
विजयप्रयोजकत्वान्निरुप्यन्ते ।

पञ्चभेदाः संति – सव्यभिचार, विरुद्ध, प्रकरणसम, साध्यसम, कालातीता हेत्वाभासाः
इति ।

**१४. छलम्**

अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्तान्तरं परिक्ल्प्य दूषणाभिधानं छलम् ।

**१५. जाति**

असदुत्तरं जातिः । इयं जातिः उत्कर्ष समापकर्षसमादिभेदेन अनेक विधा ।

**१६. निग्रहस्थानम् :**

पराजयहेतुः निग्रहस्थानम् ।

अस्यापि न्यूनाधिक अपसिद्धान्तादि भेदेन अनेकभेदाः संति ।

लक्षणम् – विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।

**२.१.३ वैशेषिक दर्षनोक्त पदार्थ विभागः**

द्रव्य, गुण, कर्म, सामन्य, विशेष, समवाय, अभाव इति सप्तपदार्थाः ।

सप्तसु पदार्थेषु अन्तिमः अभावः । ततः पूर्वाभाविनः षड् पदार्थाः भावाः इति ।

एवं पदार्थाः

१. भाव षट् पदार्थाः । २. अभाव पदार्थ इति ।

भाव पदार्थाः पुनः ६ विध रूपः

१. द्रव्य २. गुण ३. कर्म ४. सामन्य ५. विशेष ६. समवाय भेदेन ।

अभाव पदार्थः चतुर्विध रूपः

१. प्रागभाव २. प्रध्वंसाभाव ३. अन्यन्ताभाव ४. अन्योन्याभाव

भाव पदार्थ द्रव्य विभागः नव विधः –

१. पृथिवी २. जलम् ३. तेजः ४. वायुः ५. आकाशां ६. कालः ७. दिक्, ८. आत्मा ९. मनः ।

गुण पदार्थः चतुर्विंशति : भवन्ति

१. रूपं २. रसः ३. गन्धः ४. स्पर्शः ५. संख्या ६. परिमाणम् ७. पृथक्त्वम्

८. संयोगः ९. विभागः १०. परत्वम् ११. अपरत्वम् १२. गुरुत्वम् १३. द्रवत्वम्, १४. स्नेहः १५. शब्दः १६. बुद्धिः १७. सुखम् १८. दुःखम् १९. इच्छा २०. द्वेषः २१. प्रयत्नः २२. धर्मः २३. अधर्मः २४. संस्कारः इति।

कर्म पदार्थः पञ्च विधः

१. उत्क्षेपणम्  २. अपक्षेपणम्  ३. आकुञ्चनम्, ४. प्रसरणम्, ५. गमनम् ।

सामान्यम् पदार्थः द्विविधः

१. परसामान्यम्  २. अपर सामान्यम्

विशेषः, समवायः एकैक एव पदार्थः

## २.२. द्वैत वेदान्तोक्त विचारः

### २.२.१. द्वैत सिद्धान्त तत्त्व विचारः

श्रीमदानन्दतीर्थ भगवत्पादैः विरचितः ग्रंथः ''तत्व संख्यानम्'' इति

अस्मिन् ग्रंथे तत्व विभागं लक्षणम् च प्रतिपादितः ।

तत्वस्य मुख्य विभागः एवं –

*''स्वतन्त्रमस्वतन्त्रञ्च द्विविधं तत्वमिष्यते ।*

*स्वतन्त्रो भगवान् विष्णुः भावाभवौ द्विधेतरत्''* ||

श्री जयतीर्थभिक्षुणा विरचित तत्वसंख्यान टीकायां एवं निरूपणं अस्ति

*मुमुक्षुणा खलु परमात्मा जगदुदयादिनिमित्तत्वेन अवश्यम् अवगन्तव्यः*

इति सकल सच्छास्त्राणाम्, अविप्रतिपन्नोऽर्थः ।

इदञ्च ''*अवान्तरानेकभेदभिन्नस्य जगतो विज्ञानं अपेक्षत*'' इति जगदपि तथाऽवगन्तव्यम्।

तदिदं प्रधानाङ्गभूतं तत्त्वद्वयम् शास्त्रे विक्षिप्य प्रतिपादितं शिष्यहिततया सङ्गृह्य प्रतिपादयितुं इदम् तत्वसंख्यान प्रकरणम् आरभते भगवान् आचार्यः (मध्वाचार्यः) इति।

तत्त्वम् – सामन्यतो विभागेन “*स्वतन्त्रम्*” इति उक्तम् ।

- अत्र तत्वम् इत्यत्र, “*अनारोपितं प्रमितिविषय*” इति यावत् । तेन, “*तस्य भावस्तत्त्वम्*” इत्यादिखण्दनानवकाशः ।
- एतद् तत्वम् द्विविधम्

  १. स्वतन्त्रम्  २. अस्वतन्त्रम्

- **स्वतन्त्र तत्त्वम्**

  “स्वरूप प्रमिति प्रवृत्ति लक्षण सत्तात्रैविध्या परानपेक्षं” स्वतन्त्रम् इति ।

- **अस्वतन्त्र तत्त्वम्**

पर अपेक्षम् अस्वतन्त्रम् इति । एवमेव तत्त्व विभागः बहुविस्तरेण तत्त्वसंख्यान ग्रंथे प्रतिपादितः ।

## २.२.१. द्वैत सिद्धान्त पदार्थ विचारः

पदार्थ सामान्य विभागः एवं दर्शितः

**दश पदार्थाः**

द्रव्य | गुण | कर्म | सामान्य | विशेष | विशिष्ट | अंशि | शक्ति | सादृश्य | अभाव

**१. द्रव्य पदार्थ विभाग :**

- विंशति द्रव्य पदार्थः इति उक्तवन्तः

  परमात्मा, लक्ष्मी, जीव, अव्याकृत – आकाश, प्रकृति तत्व, गुणत्रय, महत्तत्व, अहंकार तत्त्व, बुद्धि, मन, इन्द्रिय, तत्व, पंचतन्मात्रा तत्व, पञ्चभूत, ब्रह्माण्ड, अविद्या, वर्ण, अंधकार (***तमः***), वासना, काल, प्रतिबिम्ब ।

**२. गुण पदार्थ विभाग :**

- दोषभिन्नत्वं गुणत्वं इति । अनेके गुणाः इति प्रतिपादितः ।

- रूप, रस, गंध, स्पर्श, संख्या, परिमाण, संयोग, विभाग, परत्व, अपरत्व, द्रवत्व, गुरुत्व, लघुत्व, मृदुत्व, काठिन्य, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म, संस्कार, आलोक, शम, दम, कृपा, तितिक्षा, बल, भय, लज्जा, गाम्भीर्य, सौंदर्य, स्थैर्य, शौर्य, औदार्य, सौभाग्य, प्रभृतयो इति अनेके गुणाः ।

**३. कर्म पदार्थ विभाग :**

विहित, निषिद्ध, उदासीन भेदेन त्रिविधं कर्म ।

**४. सामान्यं पदार्थ विभाग :**

सामान्यं द्विविधम्

१. नित्यः     २. अनित्यः

**५. विशेष पदार्थ विभाग :**

भेदाभावेऽपि भेदव्यवहारनिर्वाहका अनन्ता एव विशेषाः ।

सर्वपदार्थ निष्टाः । स्वनिर्वाहकाश्च ।

ते द्विविधाः -

१. नित्यः – ईश्वरादि नित्य द्रव्य गताः ।

२. अनित्यः – घटाद्यनित्य द्रव्य गताः ।

**समवाय पदार्थ विचारः**

***समवायस्तु स्वरूपत एव नास्ति इति*** ।

**६. विशिष्ट पदार्थ विभाग :**

विशेषण सम्बन्धेन विशेष्यस्य य आकारः तद्विशिष्टम् ।

तत् द्विविधम्

१. नित्यः     २. अनित्यः

नित्यं सर्वज्ञादि विशिष्टं परब्रह्मादि ।

दितीयं दण्डादि विशेषण संबंधेन परिणतं दण्ड्यादि ॥

**७. अंशी पदार्थ विभाग :**

अंशी तु हस्तवितस्त्याद्यतिरिक्तः पटादिर्गगनादिश्चानुभवसिद्धः ॥

**८. शक्ति पदाय विभाग :**

शक्तिः चतुर्विधा

१. अचिन्त्य शक्तिः २. आधेय शक्तिः ३. सहज शक्तिः ४. पदशक्तिः

**९. सादृश्यं पदार्थ विभाग :**

सादृश्यं च पदार्थान्तिरम् ।

न तु तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वम् ।

यमलादिषु नाना । एकनिकपितमपरवृत्ति । न तु अनुगतम् ।

एतद् द्विविधम्

१. नित्य (नित्यगतं) २. अनित्य (अनित्यगतं)

**१०. अभाव पदार्थ विभाग :**

अभावः चतुर्धा –

- प्रागभावः
- प्रध्वंसाभावः
- अन्योन्याभावः
- अत्यन्ताभावः

एवं रूपेण पद्मनाभसूरि विरचिते पदार्थ संग्रहे द्वैत दर्शानुसारे पदार्थ निरूपणं।

## ३.न्याय – द्वैत मतयोः केचित् पदार्थज्ञान विषयानाम् विमर्शः

### ३.१. समवायिकारणम् समर्थनम् निरासनम् च

## ३.१.१. न्याय दर्शने समवायिकारणम् समर्थनम्

तर्क सङ्ग्रहः –

*यत्समवेतं कार्यमुत्पद्यते तत्समवायिकाराण*

*यथा तन्तवः पटस्य, पट्श्च स्वगतरूपादिः ।*

(न्यायबोधिनी व्याख्या)

यस्मिन् समवेतम् सत् = समवायेन सम्बद्धं सत्, कार्यम् उत्पद्यते, तत् सम्वायि कारणम् इत्यर्थः । उदाहरणम् = यथो तन्तव इति । येषु तन्तुषु समवायेव सम्बद्धं सत् पटात्मकं कार्यमुत्पद्यते तत् = तन्तव समवायि कारणम् इत्यर्थः ।

समवायेन जन्मभावत्वावच्छिन्नं प्रति तादात्म्य सम्बन्धेन द्रव्यस्य एव कारणत्वात् जन्यभावेषु द्रव्य–गुण–कर्मसु त्रिषु द्रव्यमेव समवायि कारणम् द्रव्ये तु द्रव्यावयवाः समवायिकारणम् । अतः गुणादावपि द्रव्यवमेव समवायि कारणम् इत्याशयः।

## ३.१.२. द्वैत दर्शने समवायिकारण निरासनम्

द्वैत सिद्धांत मतानुसारे श्री रघुनाततीर्थ यतिः विरचित ***पदार्थ विवेकः*** इति ग्रन्थम् अनुसृत्य समवायस्य निराकरण्म् एतद् रीत्या अस्ति ।

***(पदार्थ विवेकः) समावायनिराकरणम्***

यच्च 'यत्समवेत कार्यम्' इत्यादि (पूर्वोक्त ग्रन्थे) समवायि कारण लक्षणम् । तदपि वक्ष्यमाणरीत्या समवायस्य अप्रमाणाणिकत्वादयुक्तम्।

एतेन् असमवायिकारण लक्षणम् अपि निरस्तम्। द्वित्व समवायि निमित्त कारणयोः अतिव्याप्तेः च । तन्तु पटयोः उत्पन्न द्वित्वं प्रति तन्तुः पट्श्च समवायिकारणम् तन्तो पटस्य समवेतवात् समवायिकारणतया तन्तोः इव अवधृत सामर्थस्यापि सद्भावात् द्वित्वसमवायिकारणे पटे लक्षणसद्भावः सुलभः। शरीरात्मयोः उभयवृत्तिद्वित्वं प्रति शरीरात्मनयोः उभयोः अपि समवायिकारणत्वेन आत्मसवेताया अपेक्षाबुद्धिः निमित्त कारणत्वेन सामर्थ्य अवधारणात् च द्वित्वं प्रति निमित्त कारणीभूतायाम् अपेक्षा बुद्धौ लक्षणसम्भवः सुलभः।

न च समवायि कारणम् प्रयत्नासन्नतया सामर्थ्य अवधारणं विवक्षितम्। शरीर आत्मनोः उत्पत्तिद्वित्वं प्रति अपेक्षाबुद्धेः द्वित्व समवायि कारण आत्मसमवेतत्वेनैव कारणाता न गृह्यते । आत्मान्तस्य अपेक्षा बुद्ध्या शरीरात्मनोः द्वित्वोत्पत्तिः अनुपत्तेः । एवं तन्तुपटयोः उत्पन्नद्वित्वम् प्रति पटस्य न तन्तुप्रयत्नासन्नत्वेन् सामर्थ्य अवधारणम् केवलयोः तन्तुपटयोः अनुपपतेः इति वाच्यम्।

धूमज्ञानेऽतिव्याप्तेः । वह्नि ज्ञानं प्रति समवायि कारण धूमज्ञानस्यास्ति इति प्रत्यासन्नता। समवायि कारणस्य प्रत्यासन्नतयैव सामर्थ्य अवधारणमपि, नान्यथा । अन्यगतव्याप्यबुद्ध्या अन्यस्य व्यापकबुद्धि प्रसङ्गात् । स्रक्चन्दनादि दर्शने सर्पादि दर्शने धर्माधर्मयोः च अतिव्याप्तिः ।

तत्रापि सुखदुःखकारण आत्मनि तेषां प्रत्यासन्नत्वात् । अन्यगतविशय दर्शनादिना अन्यगत सुखदुःखयोः अनुत्पत्तेः समवायि कारणस्य प्रत्यासन्नतयैव सामर्थ्य अवधारणात् ।

न च आत्मनि यः प्रदेशः व्यापक बुद्ध्यादीन् प्रति समवायिकारण् तस्मिन्नेव प्रदेशे व्याप्य बुद्ध्यादेः असमवायी, न तेषां समवायि कारण प्रत्यासन्नतयैव सामर्थ्य अवधारणम् इति वाच्यम् । यस्मिन्नेव प्रदेशे द्वितीयादिशब्दाः उत्पन्नाः, न तस्मिन्नेव प्रदेशे आद्यादिशब्दा समवेता इति तेषा द्वितीयादिशब्दान् प्रति समवायि कारणप्रत्यासन्नत्वाभावेन आधादिशब्देषु अव्याप्तेः ।

यत् च अवयव – अवय्वि आदीनाम् अत्यन्त भेदमङ्गीकृत्य तत्सम्बन्धेन्नैव समवायाङ्गी करणम्, तदपि अयुक्तम् । तन्दपटादेः तद्गत रूपादिः च अभेदेन तत्र सम्बन्धानपेक्षणात्।

एतेन ''इह तत्तुषु पटः इति प्रत्ययः सम्बन्ध पूर्विकः इह इति प्रत्यतत्वात्, इह कुण्डे बदराणि'' इति प्रत्ययांववत्, जात्यादिगोचर विशिष्ट सम्बन्धनियतः, भावमात्रविषयका बाधित विशिष्ट व्यवहारत्वात् इह तन्तुषु पटः इति प्रत्यय एतत् जनकसंयोगत्व रहित सम्बन्धजन्यः ''इहं'' इति प्रत्ययत्वात्, ''इह भूतले घटाभावः'' इति प्रत्ययवत्''

- अत्र ''संयोगत्वमेतत् सम्बन्धव्यावृत्तम्'', जातित्वात् गोत्ववत् इत्यादीनि न्यायशास्त्र तार्किक उत्प्रेक्षितानि अनुमानानि निरस्तानि ।

– किञ्च, अत्र सर्वत्रानुकूलतर्काभावेन अप्रयोजकता । अर्थान्तरता वा ।इह प्रमेयत्वे प्रमेयत्वविशष्ट व्यवहारः जातौ प्रमेयत्वविशिष्ट व्यवहारो वा सम्बन्धजन्यः " इह भूतले घटाभावः" इति प्रत्ययवत् ।

– "रूप्त्वं गुणव्यावृत्तम् जातिवत् गोत्ववत्" इति आभास साम्यम् । प्रमेयत्वे प्रमेयत्वम् इत्यादि इह प्रत्यये व्यभिचारः । अपूर्वस्य सम्वायस्य पदार्थान्तरस्य कल्पनात् कल्पनागौरवम् च ।

ननु द्रव्यादयः पदार्थाः सामान्यतः त्वया आङ्गीकृताः । तत्र गुणादीनां गुणाद्यभेदम् अङ्गीकृत्य विशिष्ट व्यवहार निर्वाहायापूर्वः समवायी अङ्गीक्रियते । तत्र कोऽवसरः कल्पनागौरवस्य? इति चेत्,

समवाये तावदवयवनिष्ठ अस्तित्वम् अभिधेयत्वम् च इत्यादि धर्मजातम् अङ्गीकार्यम् । "समवायोऽवयवनिष्टो अस्त्यभिधेयश्च" इत्यादि प्रतीतेः । अवयवनिष्टत्वादि धर्मजातस्य धर्मिणा समवायेन सह सम्बन्धान्तराङ्गीकारेण अनवस्थादि आपत्या स्वयमेव सम्बन्धः स्वनिर्वाहकः च इत्याङ्गीकार्यम् । उक्त प्रमाणानाम् प्रयोजकत्वादिना दूषितत्वात् प्रमाणं विनैव समवायो अभ्युपगत्व्यश्च ।

किञ्च अवयवनिष्टात्वादि धर्मजात अनवस्थाभयेव न भिन्नम् किन्तु अभिन्नमेकम्। तत्र च आधार आधेयभाव निर्वाहाय वस्तुस्वभावाख्या विशेषो अङ्गीकार्याः। तस्यापि उक्तरीत्या विशेष विशेषि भाव निर्वाहाय स्वनिर्वाहकत्वम् अङ्गीकार्यम् । अङ्गीकृतश्च नित्यद्रव्येषु परस्पर व्यावृत्ति सिद्ध्ये स्वस्यैव व्यावर्तक रूपो विशेषः। "घटस्य स्वरूपं" इत्यादित्यवहार अनुपपत्तेः इव विशेषस्वरूपे प्रमाणमङ्गीकार्यम्।

अन्याथा पार्थिवपरमाणुगतविशेषस्यापि अपरमाणुगत विशेषात् भेदो न स्यात्। तथा च कथं मयाऽभिहितो विशेषो अपूर्वः स्यात् । त्वया अपि रीत्या अङ्गीकृतत्वात् कथं च अपूर्वः समवायो न स्यात् । अनन्यथासिद्धिप्रयोजनाभावेन अङ्गीकर्तुम् अशक्यत्वात् ।

"*इह तन्तुषु पटः*" इत्यादेः व्यवहार मात्रत्वेन प्रत्ययत्वाभावात् । तस्य च औपचारिकत्वात् । तथा च उभय सम्प्रतिपन्नविशेषादेव सर्व सामञ्जस्य

उपपत्तावप्रामाणिकम् समवायमङ्गीकृत्य तस्य च स्वनिर्वाहक नित्यत्व एकत्व आदि अङ्गीकारे कथं कल्पना गौरवं न स्यात् ?

## ३.२. तमसस्य द्रव्यतवम् समर्थनम् निरासनम् च

तमसः न तु द्रव्यं इति न्यायशास्त्रे प्रतिपादितः। तर्कसङ्ग्रहग्रन्थे नव एव

तमः अतिरिक्त द्रव्याणि प्रतिपादिता ।

किन्तु द्वैतदर्शने तमसस्य द्रव्यत्वम् समर्थितः यथा वक्ष्यमाण पदार्थविवेकः इति ग्रन्थे निरूपितः ।

## ३.२.१. न्याय दर्शने तमसस्य द्रव्यत्व निरासनम्

न्यायशास्त्रे तमो द्रव्यत्व निरासनम्

*(तर्क सङ्गहः)*

*तत्र द्रव्याणि – पृथ्वी – अप् – तेजः – वायुः – आकाश – काल – दिक् – अत्मा – मनः नवैव ।*

अत्र तमः प्रत्येक द्रव्य इति न प्रतिपादितः

*(न्याय बोधिनी व्याख्या)*

ननु अन्धकारस्य (तमस्य) दशमद्रव्यस्य सत्वार कथं नवैवेति? तथा *हि* – ‘‘*नीलम् तमश्चलति*’’ इति प्रतीतेः नीलरूपाऽऽश्रयत्वेन क्रियाऽऽश्रयत्वेन च (तमस्य) द्रव्यत्वं सिद्धम् । न च क्लृप्त द्रव्येषु अन्तर्भावात् दशमद्रव्यवमिति वाच्यम् । तमसो रूपवत्वात् आकाशादि पञ्चकस्य वायोश्च न रूपत्वात् तेषु अन्तर्भावः, तमसो निर्गन्धत्वात् पृथिव्या गन्धत्वात् पृथिव्याम् न अन्तर्भावः, तमसो निःस्पर्शत्वात् जलः तेजो शीतोष्ण स्पर्शत्वात् न तयोः अन्तर्भावः, तस्मात् तमसो दशमद्रव्यत्वम् सिद्धमिति चेत्! न ।

तमसो तेजोऽभाव रूपत्वेन एव उपपत्ताविति अतिरिक्त कल्पनायां मानाभावात् । न च विनिगमना – एकस्य एव पक्षस्य साधिका युक्तिः – तस्य विरहात् विनिगमन

विरहात् तेज एव तमोऽभाव स्वरूपं अस्ति इति वाच्यम् । तेजसाभाव स्वरूपत्वे सर्वानुभूतोष्णस्पर्ष आश्रय द्रव्यान्तर कल्पने गौरवात् । तस्मात् उष्ण स्पर्श गुणा आश्रयतया तेजसो द्रव्यत्वम् सिद्धम् । तमसि नीलत्वादि प्रतीतिः तु भ्रान्तरेव एवं कर्मवत्त्वप्रतीतिरपि दीपाऽपसरणक्रियाया एव तत्र भानात् ।

*(दीपिका व्याख्या)*

ननु तमसो दशम् द्रव्यस्य विद्यमानत्वात् कथं नवैव द्रव्याणि ? तथा हि ''*तमः खलु चलं नीलं परापरविभागवत् (न्याय लीलावती)*''। प्रसिद्ध वैधर्म्यात् नवभ्योः भेत्तुमर्हति। ''*नीलं तमश्च*लति'' इति अबाधित प्रतीति बलात् नीलरूपा धारतया क्रियाधारतया च द्रव्यत्वम् तावत् सिद्धम् ।

तत्र तमसो न आकाशादिपञ्चके अन्तर्भावो रूपवत्वात् । अत एत न वायौ स्पर्शाभावात्, सदागतित्वं अभावात्। नापि तेजसि भास्वस्वरूप अभावात् उष्ण स्पर्श अभावात् च । नापि जले – शीत स्पर्शाभावात्, नील रूप आश्रयतया च । नापि पृथिव्या गन्धत्वाभावात्, स्पर्शरहितत्वात् च ।

तस्मात् तमः दशमद्रव्यं इति चेत्! न । तमः तेजोऽभाव रूपत्वात् ।

तथाहि – ''तमो हि – न रूपिद्रव्यं – अलोकाऽसहकृतचक्षुः ग्राह्यत्वात्, आलोकाभाववत् रूपिद्रव्य चाक्षुष प्रमायाम् आलोकस्य कारणात्वात् ।''

तस्मात् तमः प्रौढ प्रकाशक तेजः सामान्याभावः ।

तत्र ''नीलम् तमश्चलति'' इति प्रत्ययो भ्रमः ।

## ३.२.१. द्वैत दर्शने तमसस्य द्रव्यत्व साधनम्

द्वैतसिद्धान्ते तमसस्य द्रव्यत्व समर्थनम् । रघुनाथ तीर्थ यतिकृत पदार्थ विवेकः इति ग्रंथम् अनुसृत्य अथ तमोविवेकः तस्य द्रव्यत्वसमर्थनम् ।

अथ तमो निरूप्यते । तस्य द्रव्यत्वे खलु अन्वये विप्रतिपद्यन्ते।

तमो न् द्रव्यं अपि तु आलोकाभव एव। अन्याथा गौरव प्रसङ्गात् । किञ्च इदं तत् द्रव्यं नित्यम्–अजन्यम् ? उत अनित्यं जन्यम् ? नाद्यः । प्रदीपारोपदिना अन्धकारस्य

ध्वंसदर्शनात्। तत् नाशेन उत्पत्ति दर्शनात् च । द्वितीये तदुपादानं वक्तव्यम् । तत् किम् न निःस्पर्श द्रव्यम्? किं वा स्पर्शद्रव्यम्? नाद्यः।

निःस्पर्शद्रव्यस्य द्रव्यान्तरारम्भकत्व अदर्शनात् । न द्वितीयः। तमसो निःस्पर्शत्व द्रव्यत्वेन स्पर्शवत् द्रव्य उपादेयत्व योगात्। न हि पृथिवीजातीयं घटादि विजातीय जलादि उपादेयं दृष्टम् । तस्मात् यावत् उद्भूत रूपवत् तेजः संसर्गाभावस्तमः न द्रव्यान्तरमिति पूर्वपक्ष संक्षेपः ।

अत्रोच्यते । तमो निःस्पर्श द्रव्यम्। तदारम्भक तमः सूक्ष्मभावोऽपि निःस्पर्श एव । निःस्पर्श द्रव्यस्य द्रव्यान्तरोपादनत्व अदर्शनं तु अप्रयोजकमेव । न हि रूपादिगुणवतो द्रव्यस्य स्पर्शप्रत्यक्षं वायोरन्यत्र दृष्टम् इति एतावता प्रमाण विरुद्ध तद्गत स्पर्शस्य प्रत्यक्षत्वाभावः स्वीकृतः ।

किञ्च, ''*नीलं तमश्चलति*'' इत्यबाधित प्रत्ययबलात् तमसि रूपादि सिद्ध्या द्रव्यत्वसिद्धिः । रामायणे "*हनुमच्छायायाम् वायुपुत्रानुयायिनी*" [६] इति । ''*दशयोजना विस्तीर्णा*''[७] इति, "*छायायां सङ्ग्रहीतायाम्*" [८] इति च, भागवते " *तमः सुघोरम् गगनच्छदम् महद्विरारयन् भूरितरेण प्रोचिषाः*'' [९], ''*पङ्क्तीभूतं हि तिमिरम्*'', ``*अथ पर्वत भूतं तत्*'' इत्यादिना च क्रिया परिमाणसङ्ग्रहण चक्र विदार्यत्वकाठिण्यादिना च द्रव्यत्वसिद्धिः । न हि अभावः क्वचित् रूप क्रियादिमान् दृष्टः श्रुतो वा ।

यद्यपि निःस्पर्श द्रव्ये अपि क्रियादिः काठिण्यादिः न दृष्टः । तथा अपि अदृष्ट विशेषादिना स्पर्शवत् द्रव्य संयोगादिना वा तदुपपन्नम् । अन्यथा करकादेः जलनातीयत्वादि असिद्धिप्रसङ्ग ।

अभावत्वे तु द्रव्यान्तरसंयोगासम्भवेन तदनुपपत्तिरेव । लक्षणं तु – प्रकाशविरोधित्वे सति भावत्वं वा । निःस्पर्शत्वे सति क्रियावत्वं वा ।

इति तमो द्रव्यनिरूपणम् ।

## ४.उपसम्हारः

जगति विषयानि कानि? तेभ्यः स्वरूपम् धर्माणि च किम्? एतानि प्रश्नानि विविध दार्शनिकाः अन्वेशितानि। द्रिष्टिकोणभेदेन ज्ञानस्वरूप भेदम् उत्पद्यते। भारतदर्शन

परम्परायाम् दार्शनिकाः वैज्ञानिक शैलि अनुसृत्य तर्कम् उपयोज्य स्वमतम् प्रतिपादितवान्। अस्मिन् प्रबन्धे पदार्थज्ञान विषयम् स्वीकारम् कृत्वा न्याय – द्वैत दर्शन मतयोः कथम् एतत् शैलि प्रयुक्तः इति दर्शितः। एवम् च सम्प्रति काले अपि एतत् रीत्या एव विचाराणि मतभेदानि वयम् विमर्शेयुः इति प्रेरणा भवेत्। इति शम्।

## ५.कृतज्ञता

दि० वेङ्कटरमण आचार्यः येन प्रेरणया न्याय दर्शन शास्त्र मार्गे आगन्तुम् धैर्यम् कृतवान्।

शास्त्रे मन्दो अपि मम त्रुटयः उपेक्ष्य अध्यापनम् कर्तारः गुरुवर्याः – आचार्यः वेङ्कटनाथन्, आचार्यः भास्कर भट्टः, आचार्या लक्ष्मी – मम हृत्पूर्वक धन्यवादाः। यत् अक्षर–पद–व्याकरण–विषयज्ञान लोपाः तत् क्षम्यताम्।

मध्वेश रा सुळिभवि (न्याय वैशेषिक विभागः, एम्. ए., २०१८ – २०२० कक्षा) महोदयाय सहृदय कृतज्ञता तस्य द्वितीय वर्षस्य प्रबन्धः अनुसृत्य न्याय द्वैत दर्शन परिचयः अस्मिन् प्रबन्धे चर्चितः।

## ६.सन्दर्भ सूचिका

[१] तर्क सङ्ग्रहः, श्रीमदन्नम्भट्टः विरचित

[२] तर्क सङ्ग्रहः न्याय बोधिनी व्याख्या, श्री गोवर्धन विरचित

[३] तर्क सङ्ग्रहः दीपिका व्याख्या, श्रीमदन्नम्भट्ट विरचित

[४] पदार्थ विवेकः, श्री रघुनाथ यतिः विरचित

[५] न्याय वेदान्त (द्वैत) दर्शनयोः प्रमुख विषय परिचय प्रबन्धः , मध्वेश रा सुळिभावि विरचित

[६] 'वायुपुत्रानुगामिनि', वाल्मीकिरामायणे सुन्दरकाण्डे १ – ७६

[७] वाल्मीकिरामायणे सुन्दरकाण्डे १ – ७५

[८] 'छायायाम् गृह्यमाणायाम्', वाल्मीकिरामायणे सुन्दरकाण्डे १ – १८३

[९] भागवते १० – १०० – ५८